# Skandaprokta Sambashivamahima

# સ્કન્દપ્રોક્તા સામ્બશિવમહિમા

## Document Information

Text title : Skandaprokta Sambashivamahima

File name : sAmbashivamahimAskandaproktA.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 14 | 115-132||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તા સામ્બશિવમહિમા

યથા શ્રેષ્ઠો મનુષ્યેષુ બ્રાહ્મણો બ્રહ્મવિત્તમઃ ।
તથા દેવેષુ સર્વેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૧૫॥

વિદ્યામધ્યે યથા શ્રેષ્ઠા વેદવિદ્યા પ્રકીર્તિતા ।
તથા દેવેષુ સર્વેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૧૭॥

ગૌરુત્તમા કામદોગ્ધ્રી યથા સર્વચતુષ્પદામ્ ।
તથા દેવેષુ સર્વેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૧૮॥

લોહમધ્યે યથા શ્રેષ્ઠં કાઞ્ચનં સર્વકામદમ્ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૧૯॥

ઐરાવતો યથા શ્રેષ્ઠો ગજેષ્વમિતવિક્રમઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૦॥

હયેષૂચ્ચૈઃશ્રવાઃ શ્રેષ્ઠો યથાઽમિતપરાક્રમઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૧॥

યથા સર્વમૃગશ્રેષ્ઠઃ સિહ્મોઽલઙ્ઘ્યપરાક્રમઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૨॥

કૈલાસઃ સર્વલોકેષુ યથા શ્રેષ્ઠો નગોત્તમઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૩॥

પુષ્યરાગો ગ્રથા શ્રેષ્ઠો રત્નેષુ ત્રિવિધેષ્વપિ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૪॥

સમુદ્રેષુ યથા શ્રેષ્ઠઃ ક્ષીરાબ્ધિરમિતપ્રભઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૫॥

સિદ્ધાનાં કપિલઃ શ્રેષ્ઠો યથા સિદ્ધાશ્રયસ્તથા ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૬॥

યથા ચિત્રરથઃ શ્રેષ્ઠો ગન્ધર્વેષુ બલોન્નતઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૭॥

યથાઽગસ્ત્યો મુનિશ્રૈષ્ઠઃ સર્વદા શિવચિન્તકઃ ।
તથા સર્વેષુ દેવેષુ શ્રેષ્ઠઃ સામ્બઃ શિવઃ પ્રભુઃ ॥ ૧૨૮॥

શિવાન્નસ્ત્યધિકો દેવઃ સત્યં સત્યં ન સંશયઃ ।
સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૧૨૯॥

ન શિવેન સમો દેવઃ સત્યં સત્યં ન સંશયઃ ।
સત્યં સત્યં પુનઃ સત્યમુદ્ધૃત્ય ભુજમુચ્યતે ॥ ૧૩૦॥

શઙ્કરસ્ય પ્રસાદેન જ્ઞાનં ભવતિ ધીમતામ્ ।
શઙ્કરસ્ય પ્રસાદેન મોક્ષો ભવતિ ધીમતામ્ ॥ ૧૩૧॥

શઙ્કરઃ સર્વભાવેન શરણ્યઃ શરણાર્થિનામ્ ।
સેવ્યઃ પૂજ્ય સદા સામ્બઃ સમેષામપ્રમાદતઃ ॥ ૧૩૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તા સામ્બશિવમહિમા પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૪ । ૧૧૫-૧૩૨॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 14 . 115-132 ..

Encoded and proofread by Ruma Dewan

---

*Skandaprokta Sambashivamahima*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*